Shodh Sangam Patrika
E-ISSN: 3049-0707, P-ISSN: 3049-172X, Volume 2 | Issue 2 | (Apr – Jun 2025)

# ऋग्वेदीयब्रह्मणसाहित्ये सामाजिकवर्णव्यवस्था

## (विशेषतः ब्राह्मणवर्णप्रसङ्गे)

**डॉ० विभूतिभूषण महापात्रः**
अध्यापकः, स्नातकोत्तरसंस्कृतविभागः
राजधानीमहाविद्यालयः, भुवनेश्वरम्, ओडिशा-751003

**सारांशः**

अस्य शोधपत्रस्य विषयः प्राचीनभारतीयसमाजे वर्णव्यवस्थायाः स्वरूपं विशेषतः ऋग्वेदीयब्रह्मणग्रन्थेषु ब्राह्मणवर्णस्य स्थानम् इत्यस्य विश्लेषणम् अस्ति। वर्णाश्रमव्यवस्था भारतीयसमाजस्य मूलसंरचना आसीत्, या गुण-कर्म-स्वभावाधारेण संस्थिता आसीत्। प्रारम्भे वर्णानां कठोरभेदः नासीत्, किन्तु कालान्तरं तस्य वंशानुगतस्वरूपं जातम्। पुरुषसूक्ते ब्राह्मणस्य उत्पत्तिः मुखात् इति दर्श्यते, येन तस्य बुद्धि, धर्म, त्याग, निष्ठा च मुख्यगुणाः इत्यपि सूच्यन्ते। ब्राह्मणस्य कर्त्तव्यानि अध्यापनम्, यज्ञानुष्ठानम्, राजोपदेशः, धर्मरक्षणं च। राजनीतिकजीवने ब्राह्मणः राज्ञः प्रमुखः परामर्शदाता आसीत्। सामाजिकजीवने तस्य प्रतिष्ठा मुखवदस्ति, यः यज्ञेन देवतानां सम्पर्कसेतुं साधयति। यद्यपि प्रारम्भे वर्णं गुणकर्माधारेण निर्धारितम्, कालान्तरे सः जात्याधारितः अभवत्। एषा अध्ययनम् ब्राह्मणवर्णस्य महत्त्वं, कर्त्तव्यपरता, तथा समाजे तस्य धार्मिकबौद्धिकप्रभावं प्रकाशयति।

**विशेषशब्दाः** – ब्रह्मणः, ऐतरेयः, कौषितकी, वर्णव्यवस्था

**०.०.० उपक्रमः**

प्राचीनभारतीयसमाजस्य संरचना वर्णव्यवस्थायामाश्रमव्यवस्थायाञ्चाधारेणासीत्। ऋषयः समाजस्य विभाजनं चत्वारवर्णेषु (ब्रह्मण-क्षत्रिय-वैश्य-शूद्राः) तथाश्रमचत्वारेषु (ब्रह्मचर्य-गार्हस्थ-वानप्रस्थ-सन्यासादयः) कृतवन्तः। समाजसङ्गठनस्येयं व्यवस्था ऋग्वेदीयब्रह्मणकालं यावद् सुस्पष्टमासीत्। एतेषां वर्णानामतिरिच्य प्राचीनभारतवर्षे अन्याः जातयः आसन्, येषामुल्लेखः शबरः, मूतिवपुलिन्दः, आन्ध्रादयः रूपेणोपलब्धाः। एताः मूलवर्णेभ्य अवरत्वात् निम्नकोटिषु गणनां क्रियन्ते तैः।

प्राचीनभारतस्य वर्णव्यवस्थां प्रति समालोचकैः निन्दां प्रशंसाञ्च कृताः, यतोहि वर्णव्यवस्थायाः मूलभावनां प्रत्यवोधता निन्दायाः कारणम् । समाजसङ्गठनस्येयं प्राचीनपरम्परा वस्तुतः तादृशी महत्त्वपूर्णा भवति, यस्याः कल्पना विश्वस्यान्यत्र कुत्रापि दुर्ल्लभाऽस्ति। अस्मिन् प्रसङ्गे प्रस्तुतेऽस्मिन् शोधसन्दर्भे ऋग्वेदीयब्रह्मणसाहित्ये वर्णव्यवस्थायाः स्वरूपमुन्मुच्य ब्रह्मणवर्णस्य प्रासङ्गिकतामालोच्यिष्यते।

१.०.० वर्णव्यवस्थायाः प्रारम्भः

भारतीयसाहित्ये वर्णव्यवस्थायाः सर्वप्रथमः सङ्केतः ऋग्वेदे लभ्यते इति केचन विद्वांस आमनन्ति। परन्तु प्रसङ्गविशेषे अस्य मन्त्रस्य कोऽपि एतादृशोद्देश्यो नास्ति। सामाजिकसमालोचकाः समालोचनासौकर्याद्

मन्त्रमिदमुद्धरन्ति। अस्तु तावदस्य पुरुषसूक्तस्याधारेण रूपकेण ज्ञायते चेत् भारतस्य समाजस्य चत्वारवर्णेषु विभज्य ऋषयः समाजपुरुषस्य कल्पनां कृतवन्तः। अस्य समाजपुरुषस्य मुखाद् ब्रह्मणः, वाह्वौ क्षत्रियः, उरोः वैश्याः, शूद्राः पद्भ्यां च विसृष्टाः। अस्याभिप्रायो भवति शरीरस्याङ्गानीव ब्रह्मणाः बुद्धिप्रज्ञादिसम्बन्धीकार्येषु, क्षत्रियाः सुरक्षादिकं कार्येषु, वैश्याः धनोपार्जनेन समाजस्य पोषणादिकं कार्येषु तथा एनं स्व स्व कर्मेषु सुष्ठु निष्णातार्थं शूद्राः परिचर्यात्मिककार्येषु नियोजिताः।

वण र्शब्दः वरणार्थक √वृ - धातोः निष्पन्नो यस्यार्थो भवति वरणं, स्वेच्छया ग्रहणमिति। अर्थात् स्ववृत्यर्थं स्वेच्छया योग्यताधारेण किमपि कार्यं ग्रहणेन जीवनयापनम्। अतः प्रारम्भिकावस्थायां गुणकर्मस्वभावानुरूपं वर्णव्यवस्थाऽऽसीत्, यस्या प्रमाणं परवर्त्तीसमये स्मृत्यादिष्वपलभ्यते।

प्रजापतेः यज्ञविधानकाले द्विविधप्रजामुत्पन्नोऽभवत्, ब्रह्मक्षत्रञ्च। तयोः यज्ञशेषं भक्षणत्वाद् ब्रह्मं हुतादः, अभक्षणे क्षत्रमहुताद इति कथ्यते। अनन्तरं वैश्यः शूद्रश्चाहुतादरूपेणोत्पन्नमभवत्। वर्णव्यवस्थाया उद्भवविषये ऐतरेयब्रह्मणे इयं कथा वर्त्तते। वर्णव्यवस्थाया उद्भवादनन्तरं वर्णानां कर्त्तव्यकर्मादिकं विभाजनमभवत्। सामाजिकदृष्ट्या भौतिकजीवनोपयोगी-साधनानामपि वर्णक्रमानुसारं विभाजनं जातम्। वैदिकच्छन्दानां वर्णानुसारं विभाजनमभवत्, यथा ब्रह्मणस्य गायत्रीना सह, क्षत्रियस्य त्रिष्टुप्च्छन्दसा साकं, वैश्यस्य जगत्या सह सम्बन्धाऽऽसीत् । एवञ्च प्रातःसवन-मध्यसवन-सायंसवनादिकं क्रमशः ब्रह्मण-क्षत्रिय-वैश्येः सह सम्बन्धाऽऽसीत्। इतोऽपि आज्यशस्त्रस्य भागत्रयमाहाव-निविद-सूक्तं क्रमशः वर्णत्रयै सह सम्बन्धितः। ब्रह्मणस्य सम्बन्धः त्रिवृत्तस्तोमेन अग्निदेवेन च साकं, क्षत्रियस्य पञ्चदशस्तोमेनसाकमिन्द्रेण च सह, वैश्यस्य सप्तदशस्तोमेन तथा शूद्रस्य एकविंशस्तोमेन साकं च सम्बन्धोऽस्ति। भक्षणविधाने ब्रह्मणस्य सोमं, क्षत्रियस्य वनस्पतिरसं, वैश्यस्य दधीं शूद्रस्य च जलं भक्षणं विधेयम्। यद्यपि वर्णानां पार्थक्यवशाद् सामाजिकनियमाः पार्थक्यमासन्, तथापि प्रारम्भिककाले एते नियमाः साधारणमासीत्, परन्तु कलान्तरे कठोरतया गृहीताः जनैः।

सामाजिकसंगठनस्य प्रारम्भसमये कोऽपि वर्णभेदः नासीदिति शास्त्रं प्रमाणयति। कालान्तरे कर्माणां विभाजनं तथा कार्यनिर्वाहस्य योग्यतानुरूपं वर्णचतुष्टयस्य विभाजनमभवत्। इयं विभाजनव्यवस्थालोच्यब्रह्मणसाहित्यं यावत् पर्याप्तरूपेणानुवंशिकमासीत्। योग्यतापेक्षया पैतृककर्मणोः प्राधान्यमासीत्। गुण-कर्म-योग्यताधारेण वर्णस्य परिवर्त्तनं परिचालनं च समाजे कष्टसाध्यं जातम्। आनुवंशिकस्वरूपस्य विकाशस्य कारणद्वयमासीत्। प्रथमतया धार्मिककर्मकाण्डव्यवस्थाया अतिशयविस्तारस्तथा शासनव्यवस्थायां राजसत्तायाः प्राधान्यम्।

### २.०.०. ब्रह्मणवर्णस्यावस्थितिः

वर्णचत्वारेषु ब्रह्मणः श्रेष्ठ इति यज्ञविधानस्य प्राधान्यात् तथा कठोरनिष्ठापरजीवनयापनव्यवस्थां प्रमाणः करोति। स्वाध्यायेनान्येषां वर्णत्रयाणामुन्नत्यर्थं तस्य प्रयत्नं विधियते। त्यागपूर्णजीवनमाचारशुद्धता, नैतिकादर्शबलेन समाजस्य महत्त्ववर्धनं तस्य प्रधानकर्मम्। ब्रह्मणेन स्वकर्मं निष्कामतया समाजकल्याणाय सम्पादनीयमिति ब्रह्मणस्य निर्देशः। यदि कोऽपि लोभवशाद् यज्ञकर्मणि स्वं समर्पयति तर्हि तं समाजः उच्छिष्टभोजनमिव त्यजति। यदि कोऽपि ब्रह्मणः स्वज्ञानस्य दुरूपयोगं कृत्वा यजमानं भीतिं प्रददाति तथा यज्ञविधाने स्वस्य वरणार्थं यजमानं प्रचोदयति तर्हि समाजे तस्य वमनभक्षणमिवं परित्यागं भवति। ब्रह्मणेन नूनं

निगूढरहस्याणां ज्ञाता भवेदितीहलौकिकपारलौकिकादि रहस्याणां ज्ञानमाहरणीयम्। स्व-चारित्रिकमहत्त्वबलेन समाजे प्रतिष्ठां लभेत। नोचेत् तस्य त्यागं करणीयम्। अप्रतिष्ठितः ब्रह्मणस्य निर्जनवने चतुर्होत्रीमन्त्रपाठस्य विधानमस्ति। ज्ञानार्जनमेव तस्य परमकर्त्तव्यम्। ज्ञानवान् ब्रह्मणः सभाजयी रूपेण सोमपानस्याधिकारीति विधिरस्ति। यः विद्वान् ब्रह्मण आचारशुद्धिपूर्वकं निष्ठापरं कर्माचरणं करोति स आयु-प्रजा-पशु-धन-यश-स्वर्गादिकमैहिकपारलौकिकञ्च फलमाप्नोति तथा शत्रुजयी भवति। शास्त्रोच्चारणशूद्धता ब्रह्मणस्य प्रतिष्ठायाः कारणमन्यथा विद्वद्भिः स अपमानितं भविष्यति। ऐतरेयब्रह्मणे विश्वन्तरराज्ञः यज्ञविधाने श्यापर्णब्रह्मणान् तथा जन्मेजयराज्ञः यज्ञकाले काश्यपब्रह्मणानशुद्धोच्चारणार्थमपमानं जातः। अस्मिन् प्रसङ्गे कौषितकिब्रह्मणे विधानमस्ति यत् शुद्धोच्चारणार्थमुत्तरदिशां प्रति गमनं विधेयम्। तत्रस्थोच्चारणशैली शूद्धं प्रामाणिकञ्चासीत्।

ब्रह्मणानां गुणधर्मविशेषे चत्वारविशेषणपदानां प्रयोगमासीत्, यथा – आदायी, आपायी, अवसायी, यथाकामप्रयाययीति । तेषां विवरणी यथा –

आदायी – दानग्राही ब्रह्मणः

आपाया – सोमपानकारी ऋत्विक् , समर्पितपदार्थानां पानकर्त्ता, दानप्रदाता

अवसायी – भोजनयाचनाकारा, सर्वत्रनिवासकारी, भोजनान्वेषी, विद्याबलाद् तत्त्वानां वेत्ता

यथाकामप्रयाययी – स्वाच्छन्दविचरणकारी, स्वेच्छया सेनाबलस्यनेता

उपरोक्तवर्णनाप्रसङ्गे, सायणभाष्यस्तथा वैदिकइण्डेक्सग्रन्थाधारेण ब्रह्मणानां स्वरूपज्ञानमत्यन्तं प्रभावहीनं ब्रह्मणानां प्रति सङ्केतयति। येषां समाजे किमपि प्राधान्यं नासीत्। केवलं दक्षिणाद्वारैवाजीविकाग्रहणं धर्ममासीत्। परन्तु ऋग्वेदीयब्रह्मणग्रन्थे ब्रह्मणानां स्वरूपचित्रणमत्यन्तमुत्कर्षकरम्। यद्यपि सायणग्रीफीतादयः केवलमुदाहरणद्वयं नित्वा ब्रह्मणानां स्वरूपनिर्धारणं कृतवन्तः। यथा मनुपुत्रं नाभानेदिष्टं तस्य भ्रतरः पितृधनात् विताडितं कृतवन्तः, तदा सः स्वोदरप्रतिपोषणार्थं दक्षिणोपार्जनार्थमङ्गिरससत्रे ऋत्विज्तया कर्मं कृतवान्। द्वितीयोदाहरणं भवति, निर्धनाजीगर्त्तः परिवारप्रतिपोषणार्थं स्वपुत्रं विक्रयामास। उक्तमुदाहरणद्वयमतिरिच्य ऋग्वेदीयब्रह्मणसाहित्ये ब्रह्मणवर्गस्य शक्तिशाल्याभिजात्यपूर्णरूपेण वर्णनमस्ति।

ब्रह्मणानामाजीविकायाः हेतु दक्षिणाविधानमनिर्वार्यं नत्वनुग्रहमेव। विना दक्षिणां कर्मं निष्फलत्वमिति ब्रह्मणस्योपदेशविधानमासीत्। ऐतरेयब्रह्मणस्य उनचत्वारिंशोऽध्याये अत्यारातियज्ञप्रसङ्गे वशिष्ठगोत्रीय सत्यहव्यपुत्रः अत्यारातिं राज्याभिषेकोपदेशं दत्वा राजापदेनाधिष्ठितं कृतवान्। अनन्तरं दक्षिणायाचना काले राजात्यारातिः मौनत्वात् पुरोहितः सक्रोद्धं तस्य सर्वस्वं प्रभावहीनं कृत्वा तां निस्तेजमकरोत्। येन तस्य राज्ञः वद्धोऽभवत्।

एतस्माद् स्पष्टं जायते, ब्रह्मणः राजानां कृपापात्रः नासीदपितु निर्मातासीत्। अश्वमेध-राजसूयादि यज्ञानामाचरणेन पुरोहितः राजानं सार्वभौमशासकपदेनाधिष्ठितं कारयति स्म।

**२.१.० ब्रह्मणस्तथा राजनीति**

तदानीन्तनसमाजे ब्रह्मणस्य राजनैतिकमहत्त्वं सर्वाधिकमासीत्। राज्यशासनार्थं पुरोहितस्य नियुक्तिरनिवार्यमासीत्। पुरोहितं विना देवताः राज्ञान्नं न गृह्णन्ति। राज्ञः धार्मिकजीवने पुरोहितरूपेण तथा राजनैतिकजीवने मुख्यपरामर्शदातारूपेण च ब्रह्मणस्य प्राधान्यमासीत्। युद्धकाले पुरोहितः शत्रुपरिहाराय धार्मिकानुष्ठानानामनुष्ठानं कृत्वा मङ्गलं विदधाति । ब्रह्मणस्य अन्तःकरणे पञ्चशक्तयः पञ्चस्थलेषु विद्यन्ते, यथा – वाक्-पाद-त्वक्-हृदयोपस्थादयः। कल्याणकारकशक्तयः क्रोधसमये अनिष्टमपि करोतीति ऐतरैया आमनन्ति। तदर्थं तं वैश्वानराग्निरिति कथ्यते। तस्याधीने विग्रहानुग्रहशक्तिद्वयं विद्यते। यथा समुद्रः भूमिं रक्षति तथैव पुरोहितः राज्ञः सुरक्षां करोतीति ऐतरेयाः। ब्रह्मणस्य ये पञ्चशक्तयः सन्ति तेषां निग्रहणार्थं, ब्रह्मणस्यागमनकाले विधानानि सन्ति। यथा प्रथमतया, कुशलप्रशं कृत्वा, वहु दिनादनन्तरं भवानागतरिति कथनीयम्। अनन्तरं तेभ्यो आसनं दातव्यम्। येन तस्य वाणीविघ्नं प्रशान्तयति। पादक्षालनेव पदविघ्नशक्ति निःसारयति। अलङ्करणेन वस्त्रभूषणादिद्वारा त्वक्विघ्नं निवारयति। तर्पणेन हृदयस्य विघ्नं तथा स्वच्छन्दनिवासद्वारैवोपस्थविघ्नशंक्ति प्रशान्तं करोति। एवं ब्रह्मणाशीर्वादेन स्वर्लोकं प्रति गच्छतीति शास्त्रवचनम्। इतोऽपि निष्कण्टकराज्यभोगमामरणं पूर्णायुं यावद् राजा करोति ब्रह्मणप्रसादात्।

उपर्युक्तालोचनाद् ज्ञायते यत् ब्रह्मणस्य राजनैतिकमहत्त्वमनिर्वार्यमासीत्। येन राष्ट्रस्य मङ्गलं समृद्धिञ्च भविष्यतीति ऐतरेयोपदेशः। राज्ञः स्वेच्छाचारीताप्रशमने ब्रह्मणस्य नियन्त्रणमनिर्वार्यमित्ययं विधानः।

**१.२.१ ब्रह्मणस्य सामाजिकप्राधान्यता**

शरीरस्य मुखमिव समाजे ब्रह्मणस्य प्राधान्यमासीत् तदा। ब्रह्मणसाहित्ये तां दिव्यवर्णयुक्तः, देवानां निवासस्थानम्, प्रत्यक्षदेवमादिरूपेण वर्णनां विद्यते। ब्रह्मणसम्पादितः यज्ञः देवान् प्रति गच्छति, तदर्थं स साक्षादेव यज्ञरूपो भवति। ब्रह्मणस्य केचन विशेषाधिकारर्यथा- ब्रह्मणस्य निन्दा न करणीयमिति कौषीतकी ब्रह्मणः। ब्रह्मणं प्रत्यपशब्दवदितारं प्रति दण्डविधानं तैतिरीयोक्तिः। यज्ञशिष्टभागस्य ग्रहीता केवल ब्रह्मणो भवति। राज्ञगृहे ब्रह्मणस्य स्वाच्छन्दविचरणाधिकारं वर्त्तते।

**१.२.२ ब्रह्मणस्य कर्त्तव्यः**

समाजस्य बौद्धिकस्तथाध्यात्मिकहितसाधने ब्रह्मणः सततोद्यमी भवेद्। स्वज्ञानगुणानां सहायेन अन्यस्योन्नतिसाधनं तस्य प्रधानकर्त्तव्यम्। एतदर्थ अध्यापनभारं ब्रह्मणस्य स्कन्धे दीयते। स्वाध्याय तस्य प्रधान कर्ममासीत् । यज्ञानुष्ठानं शिक्षणमुभयञ्च प्रति ब्रह्मणस्य ध्यानं दातव्यमिति ऐतरेयाः।

**१.२.३ ब्रह्मणस्याध्यापनाधकिारः**

पूर्वमुक्तं यदध्यापनमनिर्वार्यं कर्मं ब्रह्मणस्य। येन माध्यमेन कर्मकाण्डस्य विविधरहस्याणां ज्ञानं परम्परानुगुणं शिष्यप्रशिष्यं यावद् विस्तारितं भविष्यति तस्मिन् विषये अवधानं दातव्यमिति कौषीतकी ब्रह्मणः। स्वपुत्रमस्मिन् विषये प्राथमिकतया शिक्षणं दातव्यमिति येन तस्य परम्परा वर्धनं भविष्यति।

**१.२.४ धार्मिककर्मकाण्डाणां सम्पादनम्**

यद्यपि गृह्ययज्ञेषु पुरोहितं विना कार्यं सम्पादनं भवति, तथापि श्रौतयागेषु तस्यापरिहार्यतां वर्त्तते। क्रमशः लक्ष्यते पौरहित्यं ब्रह्मणवर्णस्य वंशानुगतमभवत्। ब्रह्मणाः यज्ञार्थं प्रयोजनीयं, येन हविः प्रदानेन देवाः हविं गृह्णान्ति।

**२.०.० निष्कर्षः**

पूर्वालोचनाप्रसङ्गे ज्ञायते यत् ऋग्वेदीयब्रह्मणग्रन्थेषु ब्रह्मणवर्णस्योत्कर्षमत्यन्ततया विधियते। सर्वेषु वर्णेषु ब्रह्मणस्य प्राधान्यमधिकमिति यदोपदेशस्तस्य किमपि रहस्यो वर्त्तते । यतोहि ब्रह्मणस्य ब्रह्मणत्वं प्राथमिकतया तस्य गुणकर्मयोग्यतानुरूपं निर्णितमासीदनन्तरं कर्मकाण्डस्य प्राधान्यत्वात् वंशानुगतमभवत्। परन्तु कठिनाध्यवसायबलेन ब्रह्मणः स्वपदमधिरोहति। परार्थजीवनयापनेन कर्त्तव्यसम्पादनं, राष्ट्रनिर्माणे सतत चेष्टां, राज्ञः नियन्त्रणं, प्रजाभ्यः त्रितापशमनं तस्य प्रधानकर्ममासीत्। लोभमोहक्रोधादिकं शमयित्वा त्यागपूतजीवनं तस्य परमावधेयम्।

**परिशीलितग्रन्थाः –**

1. ऐतरेयब्राह्मणम्। *ऋग्वेदब्राह्मणम्*। सम्पा० आर. एल. मित्र, एशियाटिक सोसाइटी ऑफ़ बेंगाल, 1879।
2. आप्टे, वामन शिवराम। *प्रैक्टिकल संस्कृत-इंग्लिश डिक्शनरी*। परिवर्धित संस्करण, मोतीलाल बनारसीदास, 1957।
3. बैशम्, ए. एल्। *द वण्डर दैट वॉज इण्डिया*। रूपा पब्लिकेशन्स, 2004।
4. चट्टोपाध्याय, के. सी.। *वैदिक चयन (Vedic Selections)*। कलकत्ता विश्वविद्यालय, 1954।
5. दास, एस. के.। *भारतीय सांस्कृतिक विरासत: वैदिक एवं उपनिषदिक काल*। खण्ड 1, रामकृष्ण मिशन संस्कृति संस्थान, 2003।
6. गोण्डा, यान्। *वैदिक साहित्य: संहिताएँ एवं ब्राह्मणग्रन्थ*। ओट्टो हार्रासोवित्ज़, 1975।
7. ग्रिफिथ, राल्फ टी. एच। *ऋग्वेद संहिता (The Hymns of the Ṛgveda)*। मुंशीराम मनोहरलाल प्रकाशन, 1973।
8. कीथ, आर्थर बेरीडेल। *वेद और उपनिषदों का धर्म एवं दर्शन*। खण्ड 1–2, हार्वर्ड विश्वविद्यालय प्रकाशन, 1925।
9. मैकडॉनेल, आर्थर ए०। *संस्कृत साहित्य का इतिहास*। डी. एप्पलटन एण्ड कंपनी, 1900।
10. सायणाचार्य। *ऋग्वेदभाष्यम्*। वैदिक संशोधन मण्डल, पुणे संस्करण, 1933।
11. शर्मा, राम शरण। *प्राचीन भारत में शूद्र: एक सामाजिक इतिहास (ई. पू. 600 तक)*। मोतीलाल बनारसीदास, 1990।